# संस्कृतवार्ताः

दिनाङ्क :-17.02.2025
प्रात: - 06:55

प्रधानमन्त्री/भारत-टेक्स-कार्यक्रम:

प्रधानमन्त्री नरेन्द्रमोदी अभिव्यक्तवान यत् देशस्य वस्त्रक्षेत्रं त्रिंशदधिक-द्विसहस्रतमवर्षं यावत् नव-लक्ष-कोटि रूप्यकाणां वार्षिकं निर्यात-लक्ष्यं प्राप्स्यति। नवदिल्ल्याः भारतमण्डपे ह्यः भारतटेक्स-पञ्चविंशत्यधिकद्विसहस्रतमे सम्मेलने उपस्थितान् जनान् सम्बोधयन् श्रीमोदी अवोचत् यत् भारतस्य सांस्कृतिक-विविधता देशस्य विविधेषु भागेषु शिल्पमानेषु वस्त्रेषु उदीयमाना वर्तते।

असौ अग्रे कथितवान् यत् विगतेषु दशसु वर्षेषु हस्तशिल्पं वर्धयितुं चतुश्शतोतर-द्विसहस्राधिकं यावत् बृहतमस्तरीयाः कार्यक्रमाः प्रचालिताः। ध्यातव्यमस्ति यत् भारतटेक्स इति एकः प्रमुखः वैश्विककार्यक्रमो वर्तते यस्यायोजनम् फरवरी मासस्य चतुर्दशदनाङ्कतः सप्तदश दिनाङ्कपर्यन्तं भवतीति।

कतरदेशस्यः अमीर

कतरदेशस्य राष्ट्राध्यक्षः शेख-तमीम-बिन-हमाद-अल-थानी इत्येषः अद्यारभ्य भारतस्य द्विदिवसीय यात्रायाम् आगच्छति यत्र असौ प्रधानमन्त्रिणा नरेन्द्रमोदिना सह मन्त्रणां करिष्यति। तेन सह एकम् उच्चस्तीयं प्रतिनिधिमण्डलमपि आयाति यस्मिन् मन्त्रिणः वरिष्ठाधिकारिणः व्यावसायिक-प्रतिनिधिमण्डलम् सम्मिलिताः वर्तन्ते। विदेशमन्त्रालयेन विज्ञापितं यत् कतरस्य प्रमुखस्य इयं यात्रा सहभागितां इतोऽपि गतिं प्रदास्यति।

अपि च भारत-कतर-देशयोर्मध्ये मैत्रीपूर्णस्य विश्वासस्य पारस्परिकसम्मानस्य च गहन-ऐतिहासिक-सम्बन्धः अपि विद्यते। विदेशमन्त्रालयेन अग्रे प्रतिपादितं यत् विगतेषु वर्षेषु व्यापार-निवेश-ऊर्जा-प्रौद्योगिक-संस्कृति-विषयान् समेत्य उभयोः देशयोः मध्ये सम्बन्धः सुदृढो जातः।

विदेशमन्त्री-सम्मेलनम्

विदेशमन्त्री डॉ. जयशङ्करः ह्यः ओमानदेशस्य राजधान्यां मस्कटनगरे हिन्दमहासागर-सम्मेलनावधौ मॉरीशस-मालदीव-नेपाल-भूटान-श्रीलङ्का देशानां स्वीयैः समकक्षैः सह उपवेशनमेकं विहितवान्। डॉ. जयशङ्करः स्वीयेन मॉरीशसदेशयेन समकक्षेण

धनञ्जय-रितेश-रामफुल-इत्येतेन सह मेलनं कृत्वा उभयोः देशयोः मध्ये मित्रतायाः विशिष्ट बन्धनस्य प्रबलतायै स्वप्रतिबद्धतां प्रकटितवान्।

तदनु मालदीवदेशस्य स्वकीयेन समकक्षेण अब्दुल्ला-खलील-इत्यमुना साकं उपवेशनम् अकरोत् यत्र उभौ नेतारौ भारत-मालदीवयोः अनेकेषु पक्षेषु वार्ता साधितवन्तौ। एतदनन्तरं श्रीलङ्का देशीयेन विजिताहेराथ-इत्येतेन सार्धमपि चर्चां कृत्वा अनेकेषु सहयोगेषु स्वाकांक्षाः प्रकटितवान्। तदनु नेपालदेशीयेन समकक्षेण आरजू-राणा-देउबा- इत्यनेन साकं भूटानदेशीयेन सहभागिना डीएन् – धुंग्येल इत्यमुना समम् च विदेशमन्त्री महत्वपूर्णेषु क्षेत्रेषु चर्चां कृतवान्। अवधेयं वर्तते यत् अष्टमं हिन्द-महासागर-सम्मेलनम् ह्यः अद्य च मस्कटनगरे ओमानस्य विदेशमन्त्रालयस्य सहयोगेन इण्डिया-फाउन्डेशन-एतद्द्वारा समायोज्यते।

<u>ओडिशा-विधानसभापत्रकम्</u>

ओडिशाराज्यस्य मुख्यमन्त्री मोहन-चरण-मांझी-इत्यसौ अद्य ओडिशा-विधानसभायाम् अस्य वित्तीयवर्षस्य कृते अर्थ-संकल्पना-पत्रं प्रस्तोष्यति। ओडिशाविधानसभायाः इदं वित्तसङ्कल्पना सत्रं त्रयोदश-दिनाङ्के समारब्धम् अपि च अप्रैलमासस्य पञ्चमं दिनाङ्कं यावत् प्रचलिष्यति। विधानसभायाम् अस्य मासस्य विंशति-एक-विंशति दिनाङ्कयोः राज्यस्य अर्थसङ्कल्पनापत्रे सामान्यचर्चा सुनिश्चिता जाता।

अपरत्र, असमविधानसभायाः अर्थसङ्कल्पनासत्रम् अद्यारभ्य मार्चमासस्य पञ्चविंशतिदिनाङ्कं यावत् दिसपुरे विधानसभायाः स्थायीभवनम् विहाय कोकराझार इत्यत्र आयोजयिष्यते।

<u>इण्डियन सुपर लीग</u>

इण्डियन सुपर लीग इत्येतस्यां प्रतिस्पर्धायाम्  ईस्टबङ्गाल-फुटबॉल-क्लब इत्यनेन दलेन कोलकातानगरे मोहम्मडन स्पोर्टिंग क्लब-इत्येतत् दलम् त्रीणिएकम् इत्यङ्कान्तरालेन पराजितम्। ॥